संस्कृतवार्ता:

दिनाङ्क : 10/01/2025 सायम् - 06:20

आदौ मुख्यवार्ताः

- उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगि-आदित्यनाथेन ऐषमो महाकुम्भाय समर्पिता आकाशवाण्याः कुम्भवाणीवाहिनी शुभारम्भिता।

- राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अवोचत् यत् भारतीयप्रवासिन: वैश्विक समुदायस्य समक्षे भारतस्य यर्थार्थचित्रं प्रदर्शयन्ति। राष्ट्रपति: प्रवासिभारतीयदिवस-सम्मेलनस्य समापनसमारोहे भाषमाणा आसीत्।

- विदेशमन्त्री डॉ. एस्. जयशङ्कर: उक्तवान् यत् लिङ्गाधारित-समानता अथ च महिलाविकास: भारतस्य वैदेशिक-नीति-अन्ताराष्ट्रिय-सम्बन्धानाम् अभिन्नाङ्गत्वेन अभिज्ञायेते इति।

- दिल्ली-विधानसभा-निर्वाचनाय अधिसूचना निस्सारिता।

- इण्डियनसुपरलीग-फुटबॉल-इत्येतस्यां प्रतिस्पर्धायाम् अद्य सायंकाले गुवाहाट्यां नॉर्थईस्ट-यूनाइटेड-दलस्य सामुख्यं पञ्जाब-एफसीदलेन सह भविष्यति।

उत्तरप्रदेश:-कुम्भवाणी

उत्तरप्रदेशस्य मुख्यमन्त्री श्री योगि-आदित्यनाथः ऐषमो महाकुम्भाय समर्पिताया: आकाशवाण्याः कुम्भवाणीवाहिन्याः शुभारम्भं विहितवान्। अस्मिन्नवसरे भाषमाणः मुख्यमन्त्री विश्वासं प्रकटितवान् यत् कुम्भवाणी न केवलं लोकप्रियतायाः नवीनां शीर्षतां प्राप्स्यति अपि तु महाकुम्भस्य भावं सुदूरवर्तिषु ग्रामेषु निवसतां जनानां मध्ये प्रापयिष्यति ये हि भौतिकरूपेण अस्य ऐतिहासिकमहोत्सवे भागं न ग्रहीतुं अशक्नुवन्।

तेन सबलं प्रतिपादितं यत् एषा वाहिनी महाकुम्भसम्बद्धाः सूचनाः विविधसमुदायान् प्रति प्रापयिष्यति। अत्रावसरे मुख्यमन्त्रिणा प्रोदीरितं यत् महाकुम्भ: एष: ऐक्यभावनाया: सन्देशं प्रसारयति इति।

मुख्यमन्त्रिणा उक्तं यत् आकाशवाणी एव जनैः सह भारतीयसंस्कृतेः योजकत्वेन अस्ति। स्वबाल्यं संस्मरन् श्रीयोगी उक्तवान् यत् बाल्यकाले सोऽपि रामचरितमानसं आकाशवाणीमाध्यमेन शृणोति स्म। श्रीयोगिना उक्तं यत् प्रसारभारत्या सुन्दररीत्या कुम्भवाणीमाध्यमेन महाकुम्भस्य भावं गृहीतम् अस्ति। अस्मिन्नवसरे कुम्भमंगलध्वनिरपि लोकार्पितः।

अत्रावधौ सूचनाप्रसारणराज्यमन्त्री डा. एल्. मुरुगनः कार्यक्रमे अस्मिन् दृश्यश्रव्यमाध्यमेन सहभागितां कृतवान् तथा च मुख्यमन्त्रिणः वाहिनीलोकार्पणाय आभारं प्रकटितवान्। प्रसारभारत्याः अध्यक्षः नवनीतकुमारसेहगलः उक्तवान् यत् प्रसारभारत्या आकाशवाण्याः दूरदर्शनस्य च माध्यमेन महाकुम्भस्य प्रसारणाय महान्तः प्रबन्धाः कृताः सन्ति।

राष्ट्रपति:

राष्ट्रपतिपदासीना द्रौपदी मुर्मु: अवोचत् यत् भारतीयप्रवासिन: जना: सर्वेषु क्षेत्रेषु यथा औषध-प्रविधि-प्रभृतिषु उत्तमं प्रदर्शनं कुर्वन्त: सन्ति। राष्ट्रपति: प्रवासिभारतीयदिवस-सम्मेलनस्य समापनसमारोहे भाषमाणा आसीत्। अयं कार्यक्रम: भुवनेश्वरस्य जनतामैदान इत्यस्मिन् स्थाने समायोजित:। अस्मिन्नवसरे राष्ट्रपति: भारतीय-प्रवासिभ्य: विविधक्षेत्रेषु उत्कृष्टतायै प्रवासि-भारतीय-सम्मानं प्रदत्तवती। केन्द्रीयमन्त्रिण: डॉ. एस् जयशङ्कर: जुएल-ओरांव: धर्मेन्द्रप्रधान: तथा च ओडिशाया: राज्यपाल: श्रीहरिबाबूकम्भम्पति: ओडिशाया: मुख्यमन्त्री मोहन- चरणमांझी अन्ये च विशेषगणमान्या: समुपस्थिता: आसन्।

## विदेशमन्त्री

विदेशमन्त्री डॉ. सुब्रह्मण्यम-जयशङ्कर: प्रत्यपादयत् यत् यावद् पर्यन्तं मानवजीवनस्य आधारगत-आवश्यकतानां पूर्ति: नैव भवति तावद् पर्यन्तं पूर्णविकासस्य लक्ष्यम् असाध्यं भविष्यतीति। श्रीजयशङ्कर: उक्तवान् यत् लिङ्गाधारित-समानता अथ च महिलाविकास: भारतस्य विदेश-नीते:अन्ताराष्ट्रिय-सम्बन्धानां च अभिन्नाङ्गत्वेन अभिज्ञायेते इति। भुवनेश्वरे अद्य प्रवासि-भारतीय-दिवसस्य चतुर्थसत्रस्य अध्यक्षपदम् अलङ्कुर्वता श्रीजयशङ्करेण एतत् प्रोदीरितम्। अत्रावसरे असौ प्रवासिदिवस: महिलानेतृत्वं प्रभावोत्सवं च – नारीशक्ति: इत्येतस्मिन् विषये चर्चां कुर्वन् महिलासम्बद्धेषु विविधेषु विषयेषु स्वीयविचारान् प्रकटितवान्। अवधेयं वर्तते यत् अद्य अष्टादशमस्य प्रवासि-भारतीय-दिवस-सम्मेलनस्य अन्तिम: दिवसो विद्यते।

## प्रधानमन्त्री

प्रधानमन्त्री श्रीमोदी उक्तवान् यत् सः द्विसहस्रसप्तचत्वारिंशत्ख्रीस्ताब्दं यावत् विकसितं भारतं निर्मातुं याः याः अपि समस्याः सन्ति तासां समाधानानि वाञ्छति। असौ सबलं प्रतिपादितवान् यत् सर्वकारीययोजनानां शत-प्रतिशतं जनप्रापणं भवेत्। अयमेव वास्तविकः सामाजिकन्यायः धर्मनिरपेक्षता च वर्तेते। भारतस्य अग्रिमोद्यमिना निखिलकामथेन समम् एकस्मिन् साक्षात्कारे प्रधानमन्त्रिणा उक्तं यत् मनुष्यत्वेन तस्माद् अपि च्युतयः सम्भवाः परन्तु ताः कदापि दुर्भावयुक्ताः न भवितुं शक्नुवन्ति। प्रधामन्त्रिणा प्रोक्तं यत् राजनीत्यां साफल्यार्थं समर्पण-दृढनिश्चय-उत्तमदलसदस्य-सर्वदोपलब्धादयः गुणाः परमावश्यकाः सन्ति ।

## दिल्लीविधानसभा

दिल्ली-विधानसभा-निर्वाचनाय अधिसूचना प्रसारिता। अनया अधिसूचनया सह सप्तति-सदस्यात्मकेभ्य: विधानसभासनेभ्य: नामाङ्कनप्रक्रिया समारब्धा। प्रत्याशिन: जनवरीमासस्य सप्तदश-दिनाङ्कं यावत् नामाङ्कनपत्राणि पूरयितुं शक्नुवन्ति। तत्रैव नामाङ्कन-प्रत्यावर्तनस्य अन्तिमं दिनं जनवरी-मासस्य विंशति-

दिनाङ्को वर्तते। अवधेयास्पदं वर्तते यत् मतदानं फरवरीमासे पञ्चमे दिनाङ्के अपरत्र मतगणना अष्टमे दिनाङ्के समुद्घोषितं वर्तते।

छत्तीसगढ-माओवादिन:

छत्तीसगढराज्ये बीजापुरजनपदे त्रयोदशसङ्ख्यकै: माओवादिभि: आत्मसमर्पणं कृतम्। जनपदस्य वरिष्ठाधिकारिणां केन्द्रीयारक्षितारक्षिबलानां समक्षे एतै: माओवादिभि: आत्मसमर्पणं कृतम्। एतेभ्य: माओवादिभ्य: आहत्य त्रयोदशलक्षरूप्यकाणां धनराशि: समुद्घघोषित:। एतेषु द्वयो: माओवादिन्यो: पञ्चलक्षरूप्यकाणि अपरत्र त्रिषु माओवादिषु एकलक्षरूप्यकाणि उद्घोषितानि सन्ति। आरक्षकाधीक्षकेन सूचितं यत् शरणागतेभ्य: माओवादिभ्य: छत्तीसगढप्रशासनस्य पुनर्वासनीत्या: अन्तर्गतं पञ्चविंशतिसहस्ररूप्यकाणां राशि: प्रदत्त:।

अमेरिका-अरण्याग्नि:

संयुक्त-राज्य-अमेरिकाया: लॉस-एंजलिस् इति स्थानस्य प्रभागेषु दुरापन्ने भीषण-अरण्याग्निकाण्डे दशजना: मृता:। प्राशासनिका: उक्तवन्त: यत् इयं संख्या तावत् अनिश्चिता स्थास्यति यावत् अन्वेषकेभ्य: सुरक्षितं वातावरणं न भवेत्, लॉस एंजलिस् मध्ये निवसन्त: अशीत्युत्तरैक-लक्षमिता: जना: स्थानं रिक्तं कर्तुं कथिता: सन्ति। विद्यालय-गृहाणि समेत्य त्रिशतोत्तर-पञ्चसहस्रं भवनानि पूर्णतया नष्टानि जातानि सन्ति।

हिन्दीसम्मेलनम्

श्रीलङ्कादेशे अद्य कोलम्बोनगरे आयोजिते प्रथमे भारत-श्रीलङ्का-हिन्दीसम्मेलने हिन्दीभाषाया: प्रथम: प्रमाणपत्र-पाठ्यक्रम: समारब्ध:। अस्य पाठ्यक्रमस्य अनावरणं श्रीलङ्का-देशस्य उच्चशिक्षामन्त्रालयस्य उप-मन्त्री डॉ. मधुरा-सेनेविरत्ने इत्येष: श्रीलङ्कादेशेन च भारतस्य उच्चायुक्त: सन्तोषझा: कृतवन्तौ।

इण्डियनसुपरलीग-फुटबॉलप्रतिस्पर्धा

इण्डियनसुपरलीग-फुटबॉल-इत्येतस्यां प्रतिस्पर्धायाम् अद्य सायंकाले गुवाहाट्या: इन्दिरागांधी-एथलेटिक-क्रीडाङ्गणे नॉर्थईस्ट-यूनाइटेडदलस्य सामुख्यं पञ्जाब-एफसीदलेन सह भविष्यति। ।। इति वार्ता:।।